M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1485

Title : Raghuvamsa
4th Sarga

1435

Incomplete

Raghu Vamsha - Sarga 4	: Title
	: Author
	: Editor
	: Year, Vols.
	: Publisher
1435	: Remarks

वर्तुलं भंगजाकारं पुराद्वारे प्रतिष्ठितं पारा: शारदि कुर्वंति [illegible] ध्वज उच्यते ५

श्रीगणेशाय नमः॥ स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ॥ दिनांते निहितं तेजः सवित्रेव
हुताशनः॥१॥ दिलीपानंतरं राज्ये तं निशम्य प्रतिष्ठितं॥ पूर्वं प्रधूमितो राज्ञां हृदयेग्नि
रिवोत्थितः २ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः॥ नवाभ्युत्थानदर्शिन्यो ननंदुः
सप्रजाः प्रजाः ३ सममेव समाक्रांतं द्वयं द्विरदगामिना॥ तेन सिंहासनं पित्र्यमखिलं
चारिमंडलं ४ छायामंडललक्ष्येण तमदृश्या किल स्वयं॥ पद्मा पद्मातपत्रेण भेजे
साम्राज्यदीक्षितं ५ परिकल्पितसांनिध्या काले काले च बंदिषु॥ स्तुत्यं स्तुतिभिरर्थ्या
भिरुपतस्थे सरस्वती ६ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः॥ तथाप्यनन्यपू
र्वेव तस्मिन्नासीद्वसुंधरा ७ स हि सर्वस्य लोकस्य युक्तदंडतया मनः॥ आददे नातिशी
तोष्णो नभस्वानिव दक्षिणः ८ मंदोत्कंठाः कृतास्तेन गुणाधिकतया गुरौ॥ फले
न सहकारस्य पुष्पोद्गम इव प्रजाः ९ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं॥ पूर्व ए
सहकारो निसौरभः इत्यमरः

लक्ष्मीः पद्मालया पद्मा इत्यमरः

द. [illegible]

न्यस्ताक्षरास्वं दिलीपं च नं च सभ्राविशांपतिं
सन्नामधुजनराचेहादिशत्यामे वार्पितं ३

रघु. ४ वाभवत्तस्मिन्नाभवदुत्तरः १० पंचानामपिभूतानामुत्कर्षंपुपुषुर्गुणाः ॥ नव
तस्मिन्महीपालेसर्वंनवमिवाभवत् ११ यथाप्रह्लादनाच्चंद्रः प्रतापात्तपनोयथा ॥
१२ मवेत्तस्मिन्महीपालेसर्वंनवमिवाभवत् ॥ तथैवसोभूदन्वर्थोराजाप्रकृतिरंज
नात् ॥ कामंकर्णांतविश्रांतेविशालेतस्यलोचने ॥ चक्षुष्मत्तातुशास्त्रेणसूक्ष्मका
र्यार्थदर्शिना ॥ १३ लब्धप्रशमनस्वस्थमथैनंसमुपस्थिता ॥ पार्थिवश्रीर्द्वितीयेव
शरत्पंकजलक्षणा १४ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मासुदुःसहः ॥ प्रतापस्तस्यभानो
श्चयुगपद्व्यानशेदिशः १५ वार्षिकंसंजहारेंद्रोधनुर्जैत्रंरघुर्दधौ ॥ प्रजार्थसाधने
तौहिपर्यायोद्यतकार्मुकौ १६ पुंडरीकातपत्रस्तंविकसत्काशचामरः ॥ ऋतुर्वि
डंबयामासनपुनःप्रापतच्छ्रियं १७ प्रसादसुमुखेतस्मिंश्चंद्रेचविशदप्रभे ॥ तदा
चक्षुष्मतांप्रीतिरासीत्समरसाद्वयोः १८ हंसश्रेणीषुतारासुकुमुद्वत्सुचवारिषु ॥ १

नक्षत्र कुमुद्वान्कुमुदप्राये समरः
मृदूर्मिमंतारा

अभ्याशानकुमुद्वतेत्यमरः ॥ करातककराभ्यांमेद्राचनेत्राभ्यांचमदश्रुतिः ॥

विभूतयस्तदीयानांपर्यस्तायशसामिव १९ इक्षुच्छायानिषादिन्यस्तस्यगोप्तु
र्गुणोदयं ॥ आकुमारकथोद्घातंशालिगोप्योजगुर्यशः २० प्रससादोदयादंभः
पराजयं कुंभयोनेर्महौजसः ॥ रघोःपरिभवाशंकिचुक्षुभेद्विषतांमनः २१ मदोदग्राःककु
अगस्त्यः कुंभसंभव इत्यमरः द्मंतःसरितांकूलमुद्रुजाः ॥ लीलाखेलमनुप्रापुर्महोक्षास्तस्यविक्रमं २२ प्रस
वैःसप्तपर्णानांमदगंधिभिराहताः ॥ असूययेवतन्नागाःसप्तधैवप्रसुस्रुवुः २३ गजेपिनागमा तंगाविस्यमरः
सरितःकुर्वतीगाधाःपथश्चाश्यानकर्दमान् ॥ यात्रायैप्रेरयामासतंशक्तेःप्रथमंशर
त् ॥ २४ ॥ तस्मैसम्यग्घुतोवह्निर्वाजिनीराजनाविधौ ॥ प्रदक्षिणार्चिर्व्याजेनहस्तेनेव
जयंददौ ॥ २५ ॥ सगुप्तमूलप्रत्यंतःशुद्धपार्ष्णिरयान्वितः ॥ षड्विधंबलमादायप्रतस्थेदि
ग्जिगीषया ॥ २६ ॥ अवाकिरन्वयोवृद्धास्तंलाजैःपौरयोषितः ॥ पृषतैर्मंदरोद्धूतैःक्षी
रोर्मयइवाच्युतं ॥ २७ ॥ सययौप्रथमंप्राचींतुल्यःप्राचीनबर्हिषा ॥ अहिताननिलोद्धूतैः

सप्तपर्णोविशालत्वक्शारदोविषमच्छदः ॥ अयःशुभावहोविधिरित्यमरः

अथ वरण्ये विपिने रतिमरः॥ ॥ सुगमं॥ समानौ मरुधन्वानौ विरलस्मरः॥ नाव्यं त्रिलिंगो नौतार्ये इत्यमरः

रघुं.४ मार्जयन्निव केतुभिः॥२८॥ रजोभिः स्यंदनोद्धूतैर्गजैश्च घनसंनिभैः॥ भुवस्तल
मिव व्योम कुर्वन्व्योमेव भूतलं॥२९ प्रतापोग्रे ततः शब्दः परागस्तदनंतरं॥ य
२ यौ पश्चाद्रथानीकं चतुःस्कंधेव सा चमूः ३० मरुपृष्ठान्युदंभांसि नाव्याः सुप्र
तरा नदीः॥ विपिनानि प्रकाशानि शक्तिमत्वाच्चकार सः ३१ स सेनां महतीं कर्षन्पूर्व
सागरगामिनीं॥ बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३२ त्याजितैः फलमुत्खा
तैर्भग्नैश्च बहुधा नृपैः॥ तस्यासीदुल्बणो मार्गः पादपैरिव दंतिनः ३३ पौरस्त्या
नेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी॥ प्राप तालीवनश्याममुपकंठं महोदधेः ३४
अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव॥ आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य
पुरोगमाः वैतसीं ३५ वंगानुत्खाय तरसा नेता नौसाधनोद्यतान्॥ निचखान जयस्तंभान्
गंगास्रोतोंतरेषु सः ३६ आपादपद्मप्रणताः कलमा इव ते रघुं॥ फलैः संवर्धयामा २

पादौत्कैवुरायाः॥ः॥नि भंग कारा॥ फलं फले धने जीवे निष्पत्तौ भोगवत्सुभयोः सस्य इति केशवः॥

त्वग्भेदात्शोणितस्रावान्मांसस्य व्यथनादपि॥ आत्मानं यो न जानाति तस्यांकुरभीरवेदिनः॥

मूलोत्खातप्रतिरोपिताः ३७ स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः॥ उत्कलादर्
शितपथः कलिंगाभिमुखो ययौ ३८ स प्रतापं महेंद्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत्॥
अंकुशं द्विरदस्येव यंता गंभीरवेदिनः ३९ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाध
नः॥ पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः॥४०॥ द्विषां विषह्य काकुत्स्थस्त
त्र नाराचदुर्दिनं॥ सन्मंगलस्नात इव प्रतिपेदे जयश्रियं॥४१॥ तांबूलीनां दलैः
स्तत्र रचितापानभूमयः॥ नारिकेलासवं योधाः शात्रवं च पपुर्यशः॥४२॥ गृहीत
प्रतिमुक्तस्य स धर्मविजयी नृपः॥ श्रियं महेंद्रनाथस्य जहार न तु मेदिनीं॥४३॥
ततो वेलातटेनैव फलवत्पूगमालिना॥ अगस्त्याचरितामाशामनाशास्यजयो य
यौ॥४४॥ स सैन्यपरिभोगेन गजदानसुगंधिना॥ कावेरीं सरितां पत्युः शंकनी
यामिवाकरोत्॥४५॥ ~~बलैरध्युषितास्तस्य~~ भयोत्सृष्टविभूषाणां तेन केरलयोषितां॥

र.पु.४ अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥४५॥ बलैरध्युषितास्तस्य
विजिगीषोर्गताध्वनः॥मारीचोद्भ्रांतहारीता मलयाद्रेरुपत्यकाः॥४६॥
३ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः॥ तुल्यगंधिषु मत्तेभकटेषु फल
रेणवः॥४७॥ आजानेयखुरक्षुण्णपंकेलाक्षेत्रसंभवं॥ व्यानशे सपदि व्यो
म कीटकोशावलिरजः॥४८॥ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं॥ नास्र
सत्करिणां ग्रैवं त्रिपदीछेदिनामपि॥५०॥ दिशि मंदायते तेजो दक्षिणस्यां रवेर
पि॥ तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे॥५१॥ ताम्रपर्णीसमेतस्य मुक्ता
सारं महोदधेः॥ ते[redacted]निपत्य ददुस्तस्मै यशः स्वमिव संचितं॥५२॥ स निर्विश्य यथा
कामं तटेष्वालीनचंदनौ॥ स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ॥५३॥ असह्यवि
क्रमः सह्यं दूरान्मुक्तमुदन्वता॥ नितंबमिव मेदिन्याः स्रस्तांशुकमलं[redacted]घयत॥५४ ३

मुग्मं॥ तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः॥ रामास्त्रोत्सारितोप्यासीत्सह्यलग्न इवा
र्णवः॥५५॥ मरुला मारुतोद्धूतमगमत्कैतकं रजः॥ तद्योधवारवाणानामयत्न
पटवासतां॥५६॥ अभ्यभूयत वाहानां चरतां गात्रशिंजितैः॥ वर्मभिः पवनोद्धूतरा
जतालीवनध्वनिः॥५७॥ खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु॥ कटेषु करिणां पे
तुः पुन्नागेभ्यः शिलीमुखाः॥५८॥ अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ॥
अपरांतमहीपालव्याजेन रघवे करं॥५९॥ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं॥
त्रिकूटमेव तत्रोच्चैर्जयस्तंभं चकार सः॥६०॥ पारसीकांस्ततो जेतुं प्रतस्थे स्थ
लवर्त्मना॥ इंद्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी॥६१॥ यवनीमुखपद्मानां
सेहे मधुमदं न सः॥ बालातपमिवाब्जानामकालजलदोदयः॥६२॥ संग्रामस्तु
मुलस्तस्य पाश्चात्यैरश्वसाधनैः॥ शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत॥६३॥

र.वं.४ भल्लपवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीं॥ तस्तार सरघाव्याप्तैः सक्षौद्रपटलैरिव॥
६४॥ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः॥ प्रणिपातप्रतीकारः संरंभो
४ हि महात्मनां॥६५॥ विनयंते स्म तद्योधा मधुभिर्विजयश्रमं॥ आस्तीर्णाजिनर
त्नासु द्राक्षावलयभूमिषु॥६६॥ ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशं॥ शरै
रुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव॥६७॥ जितानजय्यस्तानेव कुलादर्पुरःस थ
रान्॥ महार्णवमिवौर्वाग्निः प्रविवेशोत्तरापथं॥६८॥ विनीताध्वश्रमास्तस्य सिं
धुतीरविचेष्टनैः॥ दुधुवुर्वाजिनः स्कंधान्लग्नकुंकुमकेसरान्॥६९॥ तत्र हूणाव
रोधानां भर्तृषु व्यक्तविक्रमं॥ कपोलपाटलादेशि बभूव रघुचेष्टितं॥७०॥ कांबो
जाः समरे सोढुं तस्य वीर्यमनीश्वराः॥ गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः॥
७१॥ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः॥ विविशुस्तं विन्नांनाथमुदन्वंतमि ४

वापगाः॥७२॥ ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः॥ वर्धयन्निव तत्कूट
नुद्धूतैर्धातुरेणुभिः॥७३॥ शशंस तुल्यसत्वानां सैन्यघोषेप्यसंभ्रमं॥ गुहा
शयानां सिंहानां परिवृत्यावलोकितं॥७४॥ भूर्जेषु मर्मरीभूताः कीचकध्वनि
हेतवः॥ गंगाशीकरिणो मार्गे मरुतस्तं सिषेविरे॥७५॥ विशश्रमुर्नमेरूणां छा
यास्वध्यास्य सैनिकाः॥ दृषदो वासितोत्संगा निषण्णमृगनाभिभिः॥७६॥ स
रलासक्तमातंगग्रैवेयस्फुरितत्विषः॥ आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥७७
तस्योत्सृष्टनिवासेषु कंठरज्जुक्षतत्वचः॥ गजवर्ष्म किरातेभ्यः शशंसुर्देवदा
रवः॥७८॥ तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत्॥ नाराचक्षेपणीयाश्म
त्प निष्पेषोत्पतितानलं॥७९॥ शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान्॥ जया
र.वं.र दाहरणं बाह्वोर्गापयामास किन्नरान्॥८०॥

२२-१-४ परस्परेण विज्ञातस्तेषूपायनपाणिषु ॥ राज्ञा हिमवतः सारो राज्ञः सारो हिमा २०
द्रिणा ॥८१॥ तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ॥ पौलस्त्यतुलित
२ स्याद्रेरादधान इव ह्रियं ॥८२॥ चकंपे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः ॥ त
द्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥८३॥ न प्रसेहे स रुद्धार्कमधारावर्षदु
र्दिनं ॥ रथवर्त्मरजोप्यस्य कुत एव पताकिनीं ॥८४॥ तमीशः कामरूपाणाम
त्याखंडलविक्रमं ॥ भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥८५॥ कामरूपेश्व
रस्तस्य हेमपीठाधिदेवतां ॥ रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥८६॥ इति
जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतं ॥ रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ गजानन
॥८७॥ स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणं ॥ आदानं हि विसर्गाय सतां वारि
मुचामिव ॥८८॥ सत्रांते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजे २